# संस्कृत-वार्ता:

दिनाङ्क : 26/11/2025 सायम् - 06:20

## आदौ मुख्यवार्ता:

- केन्द्रीयमन्त्रिमण्डलेन प्राय: सपादसप्तसहस्र- कोटिरूप्यकाणां वित्तीयव्ययेन सिन्टर्ड्-रेयर्-अर्थ्-परमानेण्ट्-मैगनेट्स् इत्युत्पादनस्य प्रोत्साहनाय योजना अनुमोदिता।
- राष्ट्रम् अद्य संविधानदिवसम् आचरति; राष्ट्रपतिः द्रौपदी मुर्मुः, नवदिल्ल्या: संविधान-सदनस्य केन्द्रीय-सभामण्डपे प्रस्तावना-पठनस्य नेतृत्वं अकरोत्।
- भारतं विकसितं सशक्तञ्च राष्ट्ररूपेण अग्रे गमिष्यतीति धिया प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् स्वकर्तव्यानि निर्वोढुं आह्वयत।
- देहली-आततायिनः विस्फोटे भयोत्पादकम् आततायिनम् उमर्-उन्-नबी इत्येनं आश्रयं दत्तवानिति कारणेन राष्ट्रिय-अन्वेषण-अभिकरणेन फरीदाबाद्-नगरस्य एक: निवासी गृहीत:।
- संयुक्तराष्ट्रसङ्घः अग्रिम-महासचिवस्य नियुक्तेः प्रक्रियाम् आरभत; सदस्यराष्ट्राणि महिला-अभ्यर्थिनां नामाङ्कनानां प्राधान्यतायै प्रार्थयन्।

-------------------------------------

## केन्द्रीयमन्त्रिमण्डल

केन्द्रीयमन्त्रिमण्डलेन अद्य अशीत्यधिक-द्विशतोत्तर-सप्तसहस्र कोटिरूप्यकाणां वित्तीयव्ययेन सिन्टर्ड-रेयर-अर्थ-पर्मानेन्ट-मैगनॅट्स् इत्यस्य उत्पादनं प्रोत्साहनाय योजना अनुमोदिता। अस्य प्रकारस्य प्रथमस्य उपक्रमस्य लक्ष्यम् अस्ति यत् प्रतिवर्षं षट्-सहस्र-मेट्रिक्-टन्-परिमितं एकीकृत-दुर्लभ-भू-स्थायी-चुम्बकनिर्माणं देशे स्थापयेदिति। अद्य सायङ्काले नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् मन्त्रिमण्डलीयसभायाम् अन्यानि अनेकानि निर्णयानि गृहीतानि सन्तीति।

-------------------------------------

## *संविधान दिवसः*

अद्य राष्ट्रपतिपदासीना द्रौपदी मुर्मुः संविधानदिवसस्य उपलक्ष्ये नवदेहल्याः संविधान-सदनस्य केन्द्रीय-सभामण्डपे संविधानस्य प्रस्तावना-पठनस्य नेतृत्वं कृतवती। अवसरेऽस्मिन् भाषयन्ती सा उक्तवती यत्, संविधानम् राष्ट्रियपरिचयस्य आधारः अस्ति, राष्ट्रम् अग्रे नेतुम्, औपनिवेशिक-मनोवृत्तेः स्थाने राष्ट्रवादी-दृष्टिं स्थापयितुञ्च मार्गदर्शक-संरचना अस्तीति। सा अवोचत्, संविधानेन जनानाम् आकाङ्क्षाणाम् अभिव्यक्त्यै अत्यन्तप्रभावकः प्रारूपः प्रदत्तोऽस्ति।

उपराष्ट्रपतिः सीपी राधाकृष्णनः उक्तवान् यत् संविधाने स्वतन्त्रतायै सङ्घर्षं कुर्वतां कोटिशः देशवासिनां सामूहिकज्ञानं, पवित्रता, स्वप्नानि च अन्तर्भूताः सन्ति। सः अवदत् यत् महान्तः विद्वांसः, प्रारूप-समितेः, संविधान-सभायाः सदस्याः च कोटिशः भारतीयानाम् आशाः आकांक्षाः च पूरयितुं अन्तर्दृष्टिपूर्णान् विचारान् दत्तवन्तः।

लोकसभायाः अध्यक्षः ओम-बिरलावर्यः स्वकीये वक्तव्ये उक्तवान् यत् संविधानस्य मार्गदर्शने देशः सुशासनस्य, सामाजिक-आर्थिकविकासस्य च परिवर्तन-यात्राम् आरभदिति। सः अवदत् यत्, यदि संविधानस्य अक्षरशः अनुपालनम्, अनुसरणञ्च क्रियते तर्हि स्तन्त्रतायाः शतवार्षिक्यं यावत् भारतं विकसितराष्ट्रं भवितुं शक्नुयात्। अस्मिन् अवसरे राष्ट्रपतिः मलयाळम्, मराठी, नेपाली, पञ्जाबी, बोडो, कश्मीरी, तेलुगु, ओडिया, असमी इत्यादिषु भाषासु संविधानस्य अनुवादितानि संस्करणान्यपि प्रकाशितवती। स्वतन्त्रतायाः वर्षद्वयानन्तरं संविधानस्य ऐतिहासिकं स्वीकरणं स्मृत्य, संविधानदिवसस्य अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना नागरिकेभ्यः पत्रं लिखितमस्ति। सः राष्ट्रस्य प्रगतिं मार्गदर्शयितुं संविधानस्य चिरस्थायिकां भूमिकाञ्च अधोरेखितवान्। श्रीमोदी स्वकीये पत्रे उल्लिखतवान् यत् पञ्चदशोत्तरद्विसहस्रतमे वर्षे सर्वकारः पवित्रस्यास्य संविधानाख्यस्य लेखस्य सम्मानार्थं नवम्बर्-मासस्य षड्विंशति दिनाङ्कः संविधानदिवसत्वेन घोषितोऽस्तीति। प्रधानमन्त्रिणा नागरिकान् आहूय उक्तं यत् मतदानाधिकारस्य प्रयोगेण लोकाः लोकतन्त्रं सुदृढं कुर्युरिति। संसद-सविधानञ्च प्रति आत्मनः आदरानुभवान् व्यञ्जयन्, श्रीमोदी, कथं संविधानेन सामान्य-पृष्ठभूम्याः व्यक्तयः सर्वोच्चस्तरेषु राष्ट्रस्य सेवायां समर्थाः अभवन् इत्यवधानं दत्तवान्।

-------------------------------------

*पीएम-एसएईएसआईः*

प्रधानमन्त्री नरेन्द्रमोदी अद्य तेलङ्गाना-राज्यस्य हैदराबाद्-नगरे सफ्रान्-विमान-यन्त्र-सेवा-इण्डिया इति सेवायाः आभासीय-माध्यमेन उद्घाटनं कृतवान्, अस्मिन् अवसरे सम्बोधयन् सः अवदत् यत् भारतं विश्वस्य द्रुतगत्या वर्धमानेषु देशीय-विमानयान-विपणेषु अन्यतमम् अस्ति इति। सः अवदत् यत्, भारतं निवेशस्य नवान्वेषणस्य च स्वागतम् करोति, उत्पादनसम्बद्ध-प्रोत्साहन- योजनाभिः भारतं गम्यस्थानरूपेण चितुं आकर्षिताः सन्ति। प्रधानमन्त्री अवदत् यत्, देशे निवेशं कुर्वन्तः जनाः न केवलं निवेशकरूपेण अपितु सहनिर्मातृरूपेण अपि भारतं पश्यन्तीति।

श्रीमोदी अवदत् यत्, सफ्रान्-विमान-सेवा-सुविधा, स्वावलंबनस्य स्थितिस्थापकस्य च भारतस्य निर्माणार्थं महत्त्वपूर्णं सोपानम् अस्ति। सः अवदत् यत् अद्यारभ्य भारतस्य विमानयान-उद्योगः नूतनयात्रां कर्तुं सज्जः अस्ति। सः अधोरेखितवान् यत् सफ्रान् इत्यनेन स्थापितं एतत् नूतनं केन्द्रम्, भारतं वैश्विक-अनुरक्षण-परिष्करणरूपेण स्थापयितुं साहाय्यं करिष्यतीति।

-------------------------------------

*एन. आई. ए-दिल्ली बम विस्फोटः*

राष्ट्रिय-अन्वेषण-अभिकरणेन अद्य देहली-आतंक-विस्फोटन-प्रकरणे आतंकवादिनम् उमर्-उन्-नबी इत्येनं आश्रयं प्रदानाय फरीदाबाद्-नगरस्य एकः निवासी निगडितः। एकस्मिन् वक्तव्ये एन्. आई. ए. इत्यनेन सूचितं यत् हरियाणा-राज्यस्य फरीदाबाद-नगरस्य सोएब इति नाम्ना अभिधीयमानः अभियुक्तः अस्मिन् प्रकरणे गृहीतः सप्तमः प्रमुखः अभियुक्तः अस्तीति।

---------------------------------------

**ओमबिरला यू.पी.एस.सी.**

लोकसभाध्यक्षः ओम-बिरलावर्यः अद्य अवदत् यत् सङ्घ-लोक-सेवा-आयोगस्य यात्रया देशस्य प्रशासनिक-संरचना सुदृढा अभवत्। नवदिल्ल्यां यू. पी. एस्. सी. इत्यस्य शतवार्षिक-समारोहं सम्बोधयन् सः अवदत् यत् अस्याः संस्थायाः पारदर्शिता, उत्तरदायित्वम्, निष्पक्षता, गोपनीयता च यू. पी. एस्. सी. आयोगं सम्पूर्णे विश्वे पारदर्शि-संस्थायाः रूपेण अस्थापयत्। डिजिटल-युगे, कृत्रिम-बुद्धिमत्तायाः काले, जलवायु-परिवर्तनावधौ च राष्ट्रियसुरक्षायाः विषये आयोगेन प्रदत्तस्य ध्यानस्य प्रशंसां कुर्वन् लोकसभाध्यक्षः अवदत् यत् यू. पी. एस्. सी. इत्यनेन सुशासनस्य उत्कृष्टतायाः च नूतनानि प्रतिमानानि स्थापितानि सन्ति।

---------------------------------------

**संयुक्तराष्ट्रसङ्घः-महासचिवः**

संयुक्तराष्ट्रसङ्घः अग्रिम-महासचिवस्य नियुक्तेः प्रक्रियाम् आरभत; सदस्यराष्ट्राणि महिला-अभ्यर्थिनां नामाङ्कनानां प्राधान्यतायै प्रार्थयन्।

---------------------------------------

**टेस्ट-क्रिकेटः**

गुवाहाटी-नगरे द्वितीयायां क्रिकेटनिकष-क्रीडायां दक्षिण-अफ्रीका-देशेन भारतं अष्टोत्तर-चतुश्शत-धावनाङ्कैः पराजित्य अद्य द्वि-शून्यांकाभ्यां श्रृङ्खलैषा समापिता।

**॥ इति वार्ताः ॥**